M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1147

Title: Sapindi Karma Nirnaya

1147

Complete

Sapuidi Karma Nirnaya		Title
		Author
		Editor
816		Year, Vols.
		Publisher
1147		Remarks

श्रीगणेशाय नमः॥ सपिंडनाविषये ज्येष्ठकनिष्ठपुत्रादीनामधिकारनिर्णयः॥ ॥ पुत्रः पौत्रश्च तत्पुत्रः पुत्रिका
पुत्र एव च एवरूपकेभ्य ॥ असन्निधाने पूर्वेषामुत्तरे पिंडदाः स्मृताः इत्युक्तरूपसंहारात्॥ तथा पुत्रेषु विद्यमानेषु ना
न्यं वै कारयेत् स्वधामिति नियमात् तदसंनिधाने न्येऔर्ध्वदैहिकाधिकारिणः॥ अकृतपुत्रस्य ज्येष्ठेन जातमा
त्रेण पुत्री भवति मानव इति वाक्यात् बहुष्वपि पुत्रेषु ज्येष्ठस्यैवाधिकारः॥ सर्वेषां तु मते नैव ज्येष्ठेनैव तु यत्कृ
तमिति वचनात्॥ तदसंनिधाने न्यकर्तृभिः कृतेपि दशाहांतविधौ प्रोषितागमसिते पुत्रः कालादपि चिरादपि
एकादशाद्याः क्रमशो ज्येष्ठस्याविधिवत्क्रिया इति वाचोबला ज्येष्ठस्य पुत्रस्य तदधिकारसामान्य
तः सिद्धः॥ अनधिकारिणा कृतमप्यकृतमेवेति नियमात् ज्येष्ठसंनिधाने न्येषां कर्तृणां सपिंडने अ
नधिकारः॥ ज्येष्ठे विदेशस्थे सति कनिष्ठानां वृद्धिश्राद्धपिंडपितृयज्ञाद्यर्थं तु वचनबलादधिकारः प्र
सक्तः॥ नासपिंड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत्॥ न पार्वणं नाभ्युदयं कुर्वन् न लभते फलं॥ तथा भ्रा
ता वा भ्रातृपुत्रो वेत्यादि वचोभ्यः कनिष्ठादीनामप्यधिकारः॥ वृद्ध्यादिनिमित्ताद् ऋते न्येषामनधिकार॥
=कृथं= वृद्ध्यादिनिमित्तवता कनिष्ठेन कृते सपिंडने ज्येष्ठे नैकार्यमिति संशये॥ यवीयसा कृतं कर्म प्रेतस्याब्दं
विहाय तु। तज्ज्यायसापि कर्तव्यं सपिंडीकरणं पुनः॥ ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते॥ देशां
तरगतानां तु पुत्राणां तु कथं भवेत्॥ श्रुत्वा तु पवनं कार्यं दशाहांतं तिलोदकं॥ ततः सपिंडीकरणं

कुर्यादेकादशेऽहनि ॥ द्वादशाहेन कर्त्तव्यमिति शातातपोऽब्रवीत् ॥ तथा च मातापित्रोर्मृतेः काले ज्येष्ठे देशांतरस्थिते । कनिष्ठेन प्रकर्त्तव्यं सपिंडीकरणं तदेति कार्ष्णाजिनिः ॥ गतेवारोधिते ज्येष्ठे पित्रावा प्रोषिते सति ॥ षण्मासान्न निवर्त्तेत तदा कार्यं कनीयसेति संवर्त्तः ॥ पुनः सपिंडीकरण श्राद्धं पार्वणावच्छेदेन ॥ हा
अर्घ्यसंयोजनं नैवापिंडसंयोजनं तत्पत्यादिवाक्ये षष्ठ्यार्थं कनिष्ठेन कृते सति ज्येष्ठप्रेतशब्दरहितं न पार्वणवत्पुनः सपिंडीकरणनामकं श्राद्धं कार्यमिति यदुक्तं ॰ तत्रोत्तरं कृतस्य करणायोगात्पुनर्निवर्त्तयेत्क्रियां ॥ शुद्धिप्रकाशे ॥ निवर्तयति यो मोहात् क्रियामन्यनिवर्त्तितां ॥ विधिघ्नस्तेन भवति पित्रहा चोपजायते ॥ तस्मात्प्रेतक्रियाद्येन केनापि च कृता यदि ॥ न तां निवर्त्तयेत्प्राज्ञः सतां धर्ममनुस्मरन् ॥ नारायणवृत्तौ ॥ ॥ यः सपिंडीकृतं प्रेतं पृथक्पिंडेन योजयेत् ॥ विधिघ्नस्तेन भवति पितृहा चोपजायते ॥ लघुहारीतः ॥ ॥ सपिंडीकरणांतानि यानि श्राद्धानि षोडश ॥ पृथक् नैव सुताः कुर्युः पृथक्द्रव्या अपि क्वचित् ॥ उशनाः अपि ॥ ॥ न च श्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश ॥ एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥ इत्यादिवचनं चंदनिषेधितमर्थमविज्ञाय विरुद्धार्थकल्पनेतत् सर्वशास्त्रासिद्धं तथा पूर्वोक्तवचसां व्याख्या संप्रदायानुसारतः ॥ किंचित् क्रियते ॰ ॥ यवीयसा कृतं कर्म त्यक्त्वा १

नास्त्येव प्रेतशब्दं त्वित्यये त्वुक्त्वा पुनः सपिंडीं न कार्यमित्युक्तं तत्र प्रेतशब्दे त्यक्ते अर्घ्यपिंडसंयोजनं कथं स्यात् ॥ जन्मजनकयोरसत्वात् । वाक्यांतरे श्राद्धं पार्वणावच्छेदेनेत्युक्ते पार्वणविधिना कुर्यादिति सिद्धे पुनः संयोजने कृते पार्वणत्वं विहन्यते पार्वणोद्दिष्टोभयात्मकत्वं प्रसज्यते तथा त्वे पुनःकरणपूर्वोक्तदोषप्राप्तेः विध्यपराधे प्रायश्चित्तिः शिष्टाभावे प्रतिनिधिरिति स्मृत्योक्त प्रायश्चित्तप्राप्तिश्च सकलशास्त्रोल्लंघनं च भवेत् । तथा षण्मासान्न
प्रभृति निवर्त्तेतेत्यस्य गमनप्रभृतित्वं दृश्यते पुत्रस्य ॰ पितृमरणे षण्मासावधित्वे मानाभावात् ॥ केनापि नाम्नेति ॰ तथा च दशपंचसंवत्सरमोपि तस्यापि एकद्वित्रिचतुःपंचषण्मासमध्ये आगमन्यसंभावात् ॥ केनापि नागच्छतीति परोक्षज्ञानाभावाद्युक्तमशक्यं अतः भूतार्थज्ञानमेव सर्वानुभवसिद्धं तदनुरूपैव व्याख्या युक्ता विदुषां पूर्ववाक्यस्य तथा द्वादशवर्षपर्यंतप्रतीक्षायां संवृत्सराधिकप्रवासादिनिमित्तेषु प्रायश्चित्तेषु च प्रायश्चित्ते गमनकालप्रभृतित्वमेवोक्तं वृत्तिकृता तस्मात्तथैव सिद्धा पूर्वा व्याख्या ॰ पुनः सपिंडीकरणवाक्ये न संयोजनयुक्तं चेत्कार्यं तदा पुनरुपनयनं प्रापकेन वाक्येन विहितस्य तस्य सांगोपांगकर्मणः प्रवृत्तिः स्यात् ॥ तत्र तु वपनं मेखलादंडमिति वाक्येन निर्दिष्टेनांगरहितं तन्नामकं कर्ममात्रं दृश्यते ॰ यथा वा प्रथमाधानवर्षमध्ये पुत्रपश्वादिनाशे पुनराधानं कार्यमित्युक्तं तत्र संभारस्पर्शाद्यापवमानेष्ट्यंतकर्मणः प्राप्तौ तदंकितेष्टिविशेषेण वयचातस्य पुनराधानं दृष्टं कल्पसूत्रेषु तद्वत् प्रेतशब्दं तदंगभूतं संयोजनादिकं त्यक्त्वैव

सपिंडीकरणाख्यं पार्वणविधिनाश्राद्धं कार्यं देशांतरस्थेन ज्येष्ठपुत्रेणेति सिद्धं कनिष्ठानां तु श्राद्धादिनिमित्ते
पित्रैवाधिकार इति चेद्यदा ॥ भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव च ॥ सहपिंडक्रियां कृत्वा कुर्यादभ्यु

दयं तथेति वचनेन भ्रातृतत्पुत्रादीनां यदाधिकारः ॥ तदा किमु वक्तव्यं कनिष्ठपुत्राणां अधिकारः स्यादिति
इत्यादि पूर्वोत्तरशास्त्रपर्यालोचनया ज्येष्ठस्य पार्वणमेव विहितं नैकोद्दिष्टोभयात्मकं सपिंडीकरणमि
तीदं सर्वशास्त्रसिद्धार्थं हृदि निधायांत्येष्टिपद्धतौ योग्यो ज्येष्ठः पुत्रः कुर्यात्कनिष्ठोपि वेत्युक्त्वा यवीय
सोपि वचनं लिखितं अतः सकलनिबंधसंमतं पुनः पार्वणश्राद्धं सपिंडीकरणाख्यं कार्यं न संयो
अनादिकं प्रेतसंस्कारजनकं कर्मेति सिद्धं एतद्धि गुरुदेवदत्तधर्मशास्त्रानभिज्ञलोकोपेक्ष्य एव विद्वद्भिरि
ति संक्षेपः विस्तरस्तु मूलग्रंथेभ्य एवावलोकनीयः सूरिभिरिति दिक् ॥ इति सपिंडीकरणनिर्णयः ॥

॥